संस्कृत

स्तोत्र

क्रमां. १ [illegible]

# अपराधस्तोत्र

६५८/स्तो ४

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

श्रीगणेशायनमः॥ आदौकर्मप्रसंगात्कलयतिकलुषंमातृकुक्षि
स्थितंमांविण्मूत्रामेध्यमध्येक्वथयतिनितरांजाठरोजातवेदाः॥ यद्य
द्वातत्रदुःखंव्यथयतिनितरांशक्यतेकेनवक्तुं।क्षंतव्योमेपराधःशिव
शिवशिवभोश्रीमहादेवशंभो॥१॥ बाल्येदुःखातिरेकोमललुलित
वपुस्तन्यपानेपिपासानोशक्यश्चेंद्रियेभ्योभवगुणजनिताजंतवोमांतु
दंति।नानारोगोत्थदुःखेरुदनपरवशःशंकरंनस्मरामिक्षं०॥२॥ प्रौढो
हंयौवनस्थोविषयविषधरैःपंचभिर्मर्मसंधौदष्टोनष्टोविवेकःसुतधन
युवतिस्वादुसौख्येनिषण्णः।शैवेचिंताविहीनंममहृदयमहोमानगर्वा
धिरूढंक्षं०॥३॥ वार्धक्येचेंद्रियाणांविगतगतिमतिश्चाधिदेहाधि

श्रीगुरु तापैः पापै रोगैर्वियोगैर्विपद्भिश्च पुष्पं प्रोद्दिहीनं च दीनं ॥ मायामो
हाभिलाषैर्भ्रमति मम मनो धूर्जटे धर्मकर्मन्यवस्थं ॥३॥४॥ स्नात्वा प्रत्यूषकाले
स्नपनविधिविधौ नाहृतं गांगतोयं पूजार्थं वा कदाचिद्बहुतरगहनैः खंडबिल्वैर्दल
लानि । नानीता पद्ममाला सरसि विकसिता गंधपुष्पे त्वदर्थं क्षं० ॥५॥ दुग्धे म
ध्वाज्यमुक्तैर्दधिसहितसितासाहतैः स्नापितं नैव लिंगं नो लिप्तं चंदनाद्यैः कनककविरचि
तैः पूजितं न प्रसूनैः ॥ धूपैः कर्पूरदीपैर्विविधरसयुतं नैव दत्तं कदाचित् क्षं० ॥६॥
नो शक्यं स्मार्तकर्म प्रतिपदगहनं प्रत्यवायाकुलाख्यं श्रौते वार्ता कथं मे द्विजकु
लविहिते ब्रह्ममार्गे ससारे । ज्ञातो धर्मो विचारः श्रवणमननयोः कोविधि १
ध्यासितव्यः क्षं० ७॥ नग्नो निःसंगशुद्धिस्त्रिगुणविरहितं ध्वस्तमोहांधकारो

गुरुवाक्यतो भज भज श्रीपार्वतीवल्लभं ॥ १२ ॥ आयुर्नश्यति पश्यतां प्रतिदिनं याति
क्षयं यौवनं प्रत्यायांति गताः पुनर्न दिवसाः कालो जगद्भक्षकः ॥ लक्ष्मीस्तोयतरं
गभंगचपला विद्युच्चलं जीवितं तस्मान्मां शरणागतं शरणजं त्वं रक्ष रक्षाधुना
॥ १३ ॥ करचरणकृतं वाक्कायजं कर्मजं वा श्रवणनयनजं वा मानसं वापरा
धं ॥ विहितमविहितं वा सर्वमेतत्क्षमस्व जय जय करुणाब्धे श्रीमहादेव
शंभो ॥ १४ ॥ ५ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकराचार्यवि
रचितं अपराधस्तोत्रं संपूर्णं ॥ ५



श्री

# मूळ प्रत पाहण्यासाठी संपर्क

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com